**अनवस्थान** न० अव+स्था—ल्युट् न०त० । अवस्थानाभावे । ब० । वायौ पु० । चञ्चलभावे त्रि० ।

**अनवस्थित** त्रि० न अवस्थितः । चञ्चले, अस्थिरे "दयिताख-नवस्थितं नृणामिति" कुमा०। व्यभिचारवति च । "चतु-र्णामपि वर्णानां नारीष्वेतानवस्थिता" इति मनुः अन-वस्थिताव्यभिचारिणीरिति कुल्लू० । व्यभिचारिण्याश्च पत्यौ नितान्तावस्थानाभावात् तथात्वम् । अवस्थातु मत्तमे च "प्रस्थितं तमनवस्थितं प्रिया" इति रघुः अनव-स्थितम् अवस्थातुमक्षममिति" मल्लि० । [नाभावे ।

**अनवस्थिति** न० न अवस्थितिः । अभावार्थे न०त० । अवस्था-

**अनवह्वर** त्रि० अव+ह्वृ—कौटिल्ये अच् न०त० । अकु-टिले सरले 'सचेते अनवह्वरमिति" ऋ० २,४१,६ । "अनवह्वरमकुटिलमिति" भा० ।

**अनवाप्त** त्रि० न अवाप्तः । अप्राप्ते "नानवाप्तमवाप्तव्यं त्रिषु लोकेषु किञ्चनेति" गीता ।

**अनवाय** त्रि० अव+इण् घञ् अवायः अवयवः न०ब० । निरवयवे "अनवायं किमीदिने"इति ऋ० ७,१०४,२ ।

**अनवेक्षक** त्रि० न अवेक्षकः न०त० । पर्य्यालोचना हीने सदसद्विवेकहीने । [अपेक्षाभावे ।

**अनवेक्षा** स्त्री न अवेक्षा अपेक्षा अभावार्थे न०त० ।

**अनशन** अश—ल्युट् न०त० । भक्षणाभावे, उपवासे, स च भोजनविषयनिवृत्तिरूपः व्रतभेदः अहोरात्रभोजनाभाव एव तस्य प्रयोगोपाधिता । तेन यत्किञ्चित्क्षणे अभो-जनेऽपि न उपवासपदप्रयोगः । त्रिरात्रादिपदसमभिव्य-हारे तु भोजनाभावमात्रपरतेति भेदः । न०ब० । भोजनशून्ये त्रि० ।

**अनश्वर** त्रि० न नश्वरः ।नश्वरभिन्ने, स्थायिनि, नित्ये च ।

**अनस्** न० अनिति शब्दायते अन—असुन् । शकटे "दूरा-दनसा रथेन" ऋ०२,२३,१०। अनिति जीवत्यनेन करणे ल्युट् । ओदने, ओदनस्थाने, पितरि च मातरि स्त्री । उत्तरपदस्थः अव्ययी० शरदा० टच्समा० । अध्यनसम् तत्पुरुषेऽपि संज्ञायां जातौ च टच्समा० । उपानसं महानसम् अनोऽत्र भक्तस्थानम् । 'अपोषा अनस" इति ऋ० ४,३०,१० ।

**अनसूय** त्रि० नास्ति असूया यस्य । परगुणेषु दोषारोपशून्ये "श्रद्धावाननसूयश्चेति"गीता "श्रद्दधानोऽनसूयश्चेति" मनुः।

**अनसूयक** न असूयकः । असूयाशून्ये "यथा तथा हि सद्वृत्तमातिष्ठत्यनसूयक" इति मनुः ।

**अनसूया** स्त्री असु—कण्ड्वादित्वात् यक्—भावे अङ् असूया गुणेषु दोषारोपः अभावार्थे न०त० । "न गुणान् गुणि-नोहन्ति स्तौति चान्यगुणानपि । न हसेच्चान्यदोषांश्च साऽनसूया प्रकीर्त्तिते"त्युक्तलक्षणे असूयाभावे ।"एकमेव तु शूद्रस्य प्रभुः कर्म्म समादिशत् । एतेषामेव वर्णानां शुश्रू-षामनसूययेति" 'यत्किञ्चिदपि दातव्यं याचितेनानसूय-येति" च मनुः । अत्रिमुनिपत्न्यां च शकुन्तलासह-चरीभेदे शकु० ।

**अनसूयु** त्रि० असु—उपतापे कण्ड्वा० यक् उ न०त० । असूयाशून्ये "इदन्तु ते गुह्यतमं प्रवक्ष्याम्यनसूयवे" इतिगीता ।

**अनस्तमित** त्रि० न अस्तमितः गतः असम०स० । अस्तमप्राप्ते ।

**अनस्थ** पु० नास्ति अस्थि यस्य बा० अच्समा० । अस्थि-वर्जिते अवयवे "पुरस्तादनस्थ जहरवरंबमाख" इति ऋ० ८,१,३४, अस्थि अवयवः । तच्छून्ये निरवयवे सांख्य-प्रसिद्धे प्रधाने, ईश्वरमायायाञ्च "यदनस्था बिभर्त्ति" ऋ० १,१६४,४, "अनस्था निरवयवा प्रकृतिरीश्वरायत्तमाया-येति" भा० । समासान्ताभावे अनस्थि । अस्थिशून्ये त्रि० ।

**अनस्वत्** त्रि० अनः शकटमस्त्यस्य मतुप् मस्य वः सान्तत्वान्न पदत्वम् । शकटयुक्ते "अनस्वन्तः अव ऐषन्त पज्राः ऋ० १,१२६,५ ।

**अनहङ्कार** पु० न अहङ्कारः अभावार्थे न०त० । अहङ्कारा-भावे । ब० । तच्छून्ये त्रि० अहङ्कारस्याहङ्कारशब्दे वक्ष्यते ।

**अनहङ्कारिन्** त्रि० । अहमिति गर्वं करोति अहम्+कृ णिनि । न०त० । गर्वशून्ये ।

**अनहंकृत** त्रि० अहमिति कृतमहङ्कारः, भावे क्त न०ब० । अहङ्कारशून्ये "सुद वाग्यनहङ्कृत" इति मनुः ।

**अनहङ्कृति** स्त्री अहमिति क्रियते भावे क्तिन् न०त० । अह-ङ्काराभावे न०ब० । अहङ्कारशून्ये त्रि० ।

**अनहंवादिन्** त्रि० अहमिति गर्वेण न वदति वद—णिनि, गर्वरहिते "मुक्तसङ्गोऽनहंवादीति" गीता ।

**अनाकार** त्रि० नास्ति आकारोऽस्य । अवयवहीने आका-शादौ, ईश्वरे च ।

**अनाकाल** पु० आ सम्यक् अन्नादिसम्पन्नःकालः आकालः न०त० । शस्यादिसम्पन्नकालभिन्ने दुर्भिक्षे काले ।

**अनाकुल** त्रि० न आकुलः न०त० । अव्यग्रे, एकाग्रे, स्थिरे, असङ्कीर्णवाक्ये च ।

**अनाकृत** न० नेत्यनेन कृतः नाकृतः निराकृतः न०त० ।